वाभ्यग वृत् ॥ २५ ॥ स्वानां पर्वतानां च प्रकृष्टं सकलं कुलम् ॥ ततो विवाहे संपूर्णे हरो ऽगात् कौतुको ऽपसि ॥ २६ ॥ गत्वा नां च
पिता न्विधैनामर्षपसदं विकाम ॥ पार्थिवं हं ततो दत्त्वा शैलेन स विसर्जितः ॥ २७ ॥ मानितः स कृत श्वापि मंदया लय मम्य
गात् ॥ विश्वकर्मा ततस्तस्य तत्क्षणेन महाशिम गृहम् ॥ २८ ॥ निर्ममे देवदेवस्य स्वेच्छासहि स्मुसुन्दरम् ॥ सर्वांई मनन्तपा ॥२०॥
॥२०॥ स्ताभं मणिविद्रुमभूषितम् ॥ २९ ॥ स्थूणासहस्रसंयुक्तं मणिवेदिमनोहरम् ॥ गणानन्दिप्रमुखा ये यस्य द्वारि समा
श्रिताः ॥ ३० ॥ त्रिनेत्राः शूलहस्ताश्च वभुः शंकररूपिणः ॥ वाटिकाश्चास्य परितः पारिजाताः सहस्रशः ॥ ३१ ॥ कामधेनुर्म
२० णिर्दिव्यो यस्य द्वारि समाश्रितौ ॥ तस्मिन् मनोहरतरे कामवर्द्धि नौरगृहे ॥ ३२ ॥ वसतः पार्वती सार्द्धं कामो दृष्टि
पथं ययौ ॥ या तु रूपं शिवं दृष्ट्वा कामः प्रोवाच शंकरम् ॥ ३३ ॥ नमस्ते सर्वरूपाय नमस्ते वृषभध्वज ॥ नमस्ते गणानां
पापपरिहिताय नमो ऽस्तु ते ॥ ३४ ॥ त्वया विरहितं लोकं शावयस्य प्रतन्महीः ॥ त्वया रहितं किंचिद् दृश्यते सचराचरे ॥ ३५ ॥

तावत्तत्र जापेते नात्र संशयः ॥ १० ॥ इत्युक्त्वा सा हिसादेवी हिमालयसुतोऽभवत् ॥ ततस्तपायापर्णी भूत्वा तत्र स्वयं समाश्रिता ॥ ११ ॥ शिवभक्ति
रता नित्यं हरव्रतपरायणा ॥ अंशो हिमवतः पुत्री मनोऽन्यस्य महेश्वरे ॥ १२ ॥ ततो वर्षसहस्रान्ते भगवान् भूतभावनः ॥ अथाजगा
म तं देशं विप्ररूपी महेश्वरः ॥ १३ ॥ तां बालां तपसा युक्तां कृशां भावैः परीक्षितैः ॥ ततो दिव्यवपुर्भूत्वा करे जग्राह पार्वतीम् ॥ १४ ॥
तपसा निर्जितस्त्वास्मि करवाणि च किं प्रियम् ॥ ततः प्राह महेशानं मा मां मे पिता ददत् ॥ १५ ॥ तमृषीन् सप्त [illegible] प्रेषया
मास शंकरः ॥ ते तत्र [illegible] हिमवता सह ॥ १६ ॥ निवेश्य च महेशाने प्रेषिता मुनयोऽप्यमुः ॥ ततो लग्नदिने
देवा महेन्द्राद्याः [illegible] ईश्वरम् ॥ १७ ॥ ब्रह्मविष्णुपुरोगैश्च [illegible] धाम्नाग्निकायकुः ॥ [illegible] मासान्ते [illegible]
धजम् ॥ १८ ॥ हिमवान् पूजयामास मधुपर्कादिकैः शुभैः ॥ उपचारैर्मुदा युक्तो मानयन् [illegible] ॥ १९ ॥ वे
दोक्तेन विधानेन तां कन्यां समयोजयत् ॥ पाणिग्रहणविधिना द्विजातिगणसंयुतः ॥ २० ॥ [illegible] गिरिशाय [illegible]
[illegible] ॥ दानकाले च गोत्रादि [illegible] जगत्पतेः [illegible] हरः ॥ २१ ॥ [illegible] विशेषो [illegible]
[illegible] ॥ [illegible] ॥ २२ ॥

त्वाम[...]न्दरं लोकसुन्दरम् ॥४८॥ ब्रह्मलोकात्समाजग्मुः पीडिता दैत्यदानवैः ॥ तत्र नन्दिप्रभृतयो गणाः शूलभृतः पुरः ॥ ४९ ॥
गृहद्वारे [...] स्तुपाच्चत्वतस्थुः संभ्रुतचेतसः ॥ ५० ॥ देवा ऊचुः ॥ देवाश्च दुःखातुरचेतसो भग्नहतप्रभास्त्यक्ताच्छ
त्रपादिविलाः ॥ संप्राप्य मासांश्चतुरस्तपःस्थिता देवेषु सुप्ते हरतो वरां परम् ॥ ५१ ॥ छ ॥ इति श्रीस्कन्दपुराणे ब्रह्मनारदसं
वादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्याने त्रयोदशोऽध्यायः ॥ १३ ॥ गालव उवाच ॥ शक्रादयस्तु देवेशा दुःखसंतप्तमानसाः
॥२१॥ दुःखदारिद्र्यानभ्रान्तमनः कर्मेन्द्रियान्वितम् ॥ १ ॥ न प्राप्य लोकनाथं ते कृत्वा यः प्रतिमां कृतिम् ॥ तपसाराधयामासुः ॥२१॥
सर्वभूतहृदि स्थितम् ॥ २ ॥ कपर्दिनं विरसं देवं शूलहस्तं पिनाकिनम् ॥ कपालखट्वांगधरं दशहस्तं किरीटिनम् ॥ ३ ॥ उमा
सहितमीशानं पंचवक्त्रं महाभुजम् ॥ कर्पूरगौरदेहाभं सितभूतिविभूषितम् ॥ ४ ॥ नागयज्ञोपवीतेन गजचर्मसमि
२१) समन्वितम् ॥ लस्सारसचापि कृतमाधवांचितम् ॥ ५ ॥ कृतध्यानाः सुरास्तत्र यज्ञाचारे समाश्रिताः ॥ व्रतचर्यां
समाश्रित्य ध्रुवं कृत्स्नपञ्जतमम् ॥ ६ ॥ सर्वे ते रामं तेन शौचेन विहिताः सुराः ॥ ब्रह्मोवाच ॥ व्रतचर्या त्वया वत्स
प्रोक्ता संजायते कथम् ॥ ७ ॥ तस्य तु विस्तरतो ब्रूहि न तृप्यामि वचोमृतैः ॥ ८ ॥ गालव उवाच ॥ जपं भस्म च रुद्राग

त्वं गेहेऽस्मात्वं विधाता च लोकसंहारकारकः ॥ रूपं कुरु महादेव देहदानं प्रयच्छ मे ॥ ३६ ॥ ईश्वर उवाच ॥ यन्मया त्वं प्रदग्धः
सर्वेऽनेपुरतोऽनघ ॥ तस्याग्रतः समीपे त्वं पुनर्देहस्य देहवान् ॥ ३७ ॥ एवमुक्तस्ततः कामः स्वशरीरमुपागतः ॥ ववन्दे चरणौ
शंभुर्दृष्टिनयावनतोऽभवत् ॥ ३८ ॥ ततो न नाम चरणौ पार्वत्याः संप्रहृष्टवान् ॥ लब्धप्रसादस्तु [illegible] तयोः समीपात्सुवने पे ॥ २३
३९ ॥ चचार स महातेजाः महामोहवलान्वितः ॥ पुष्पधन्वा पुष्पबाणास्त्वाकुंचितशिरोरुहः ॥ ४० ॥ सदाघूर्णितनेत्रश्च
तपोरूपमुपाविशत् ॥ दिव्यासवैर्दिव्यागंधैर्वस्त्रमाल्यादिभिस्तथा ॥ ४१ ॥ सत्त्वसंभोगसमयेऽपरिवृतः समन्ततः ॥
एवं प्रक्रीडतस्तस्य वत्सराणां शतं ययौ ॥ ४२ ॥ सा गते काले निशायां मैथुने स [illegible] कचेतसः ॥ एतस्मिन्नन्तरे देवास्ता-
रकप्रद्भुताभयात् ॥ ४३ ॥ ब्रह्माणं शरणं जग्मुः स्तुवंतं शरणं गताः ॥ [illegible] ॥ तारकोऽसौ महारौद्रस्त्वया दत्तवरः पु-
पुरा ॥ ४४ ॥ विजित्य तरसा शक्रं भुंक्ते त्रैलोक्यम [illegible] जितः ॥ वधोऽपायो यथा तस्य जायते तं कुरुष्व यत्नम् ॥ ४५ ॥ ब्रह्मोवाच ॥
मया दत्तवरः स्वा सौम्यः सो [illegible] घते मही ॥ स्वयं स वधं [illegible] कंचित्कोऽपि न चार्हति ॥ ४६ ॥ तस्मात्तस्य वधोपायं कथयामि म-
हात्मनः ॥ पार्वत्यां यो महेशानात्सूनुरुत्पद्यते हि सः ॥ ४७ ॥ दिनसप्तचतुर्भूत्वा तारकं सहनिष्यति ॥ इति वाक्यं तु ते श्रु-

मा१

विहंताभवन्निंद्रुष्टबुद्धिभिः ॥ तस्मात्पापरतानां साधुप्रजन्तु निर्दिवौकसः ॥२२॥ निरपत्या निर्दयाश्च सर्वे देवा भविष्यथ ॥ ततः प्र
सादयामासुः प्रभाताः शापयन्त्रिताः ॥२३॥ महद्भुः स्वसंप्रविष्ठाः पुनः पुनरथाः ब्रुवन् ॥२४॥ देवा ऊचुः ॥ त्वं माता सर्वदेवानां
सर्वसाक्षी सनातनी ॥ उत्पत्तिस्थितिसंहारकारणं जगतां सदा ॥२५॥ भूतप्रकृतिरूपा त्वं महाभूतसमाश्रिता ॥ अपर्णा
तपसां धात्री भूमिधात्री वसुंधरा ॥२६॥ त्वं चाराध्या मंत्रबीजं विश्वबीजलयस्थितिः ॥ ब्रह्मादिरूपधात्री च स्वाहा
॥२२॥ रूपेण सर्वदा ॥२७॥ त्वं च यंत्रतमोपेता अग्नलविस्फुलिंगादिषु ॥ नित्यरूपा महारूपा सर्वरूपा निरंजना ॥२८॥ देवत्रय ॥२२॥
समाश्रोतजननैः श्रेयस्प्रदा ॥ महालक्ष्मी महाकाली महादेवी महेश्वरी ॥२९॥ विश्वेश्वरी महामाया मायाबीज
वरप्रदा ॥ वररूपा वरेण्या त्वं वरदात्री वराप्नुतां ॥३०॥ बिल्वपत्रैः शुभैर्ये त्वां पूजयन्ति नराः [illegible] सदा ॥ तेषां राज्य
22 प्रदात्री च कामदा सिद्धिदा सदा ॥३१॥ चातुर्मास्येऽर्चिता वै त्वं बिल्वपत्रैर्विशेषतः ॥ तेषां वांछितदा हि त्वं स्वयं जाता
कामदुघा स[illegible] यम ॥३२॥ ये त्वं येर्चयन्ति सदा लोके महेश्वरसमन्विताम् ॥ बिल्वपत्रैर्महाभक्त्या न तेषां दुःख
ड्कृती ॥३३॥

मा३ मे१

कपालं स्फाटिकं तथा ॥ तुङ्गमाल्यं पंचवक्त्रं मर्द्धचन्द्रं च मूर्द्धनि ॥ ९ ॥ चित्रं त्वक्परीधानं कौपीनं कुण्डलद्वयम् ॥ घंटा कुंभं
त्रिशूलं च सूत्रं च व्यालरूपकम् ॥ १० ॥ अमीभिर्लक्षणैर्युक्तं मयोक्तं तव षण्मुख ॥ अनेन विधिना सर्वे देवा वह्निपुरोगमाः
॥ ११ ॥ सर्वे राधयामासुः सर्वपापैर्विरच्यतम् ॥ चातुर्मास्ये च संपूर्णे संपूर्णे कार्तिके मखे ॥ १२ ॥ चीर्णव्रतान् सुरान् दृष्ट्वा वि
शुद्धांश्च महेश्वरः ॥ मत्प्रीते षां हृदो तुष्टो जीवात्मा सर्वभूतहृत्पु ॥ १३ ॥ शांतबुद्धिय जाप्येन च विधानसहितेन च ॥ ध्यानेन
दीपदानेन चातुर्मास्येन तोषितः ॥ १४ ॥ पूजनैः षोडशविधैर्यथाविसोमपापूरे ॥ कर्शयान् भक्तिभावेन ह्यात्मीदे
वान् समागतान् ॥ १५ ॥ प्रहृष्टो भगवान् रुद्रो दृष्ट्वा तेषां शुभां मतिम् ॥ ततः संमन्त्र्य ते देवा वह्निं स्तुत्वा यथार्थतः ॥ १६ ॥
प्रसन्नवदनं च क्रतुः कार्यसाधनतत्परम् ॥ कर्मसाक्षी महातेजाः कृत्वा पारावतं वपुः ॥ १७ ॥ प्रविवेश ततो मध्ये द्रष्टुं
देवं महेश्वरम् ॥ चकार गतिविक्षेपं गुंठनैर्वकुंठनैः ॥ १८ ॥ जुंठनैः स्पर्शयोश्चैव चारुरूपो मुहुर्तंगतिः ॥ तं दृष्ट्वा भगवां
स्तत्र कारणं समबुध्यत ॥ १९ ॥ क्रुद्धो नाम ततस्तस्मिन् समजीवो दृष्टवान् इतम् ॥ वीर्यं वह्निमुखे चैव सोत्पपात गृहाद्बहिः
॥ २० ॥ गते तस्मिन् पतंगे तु पार्वती पिफूल श्रमा ॥ संक्रुद्धा सर्वदेवानां साशशाप महेश्वरी ॥ २१ ॥ यस्मान्ममैव

न्म २

॥स्वजनस्य च ॥७॥ कस्मात्पुरा पुंस कूर्मी श्रिता नाम यतां पुरा॥ एकदा शिवभक्तानां विवा[illegible]दः सुमहानभूत्॥८॥ समं केशवभक्तैश्च
परस्परं जयैषिणः॥ तेन स्तु भगवान् रुद्रः स्वभक्तानां च पश्यताम्॥९॥ एकं विष्णुगरौः ऊर्ध्वेन रूपं महाद्भुतम्॥ तदार्ह
रिहरात्मं च देहार्द्धेन दधार सः॥१०॥ हरश्चैवार्द्धदेहेन विष्णुरर्द्धेन चाभवत्॥ एकं हि विष्णुचिन्हानि हरचिन्हानि चै
कतः॥११॥ एकतो वैनतेयश्च वृषभश्चान्यतोऽभवत्॥ वामतो मेघवर्णाभो देहोऽन्यनिच योपमः॥१२॥ कर्पूरगौरः सव्ये
तु सम[illegible]गायत वै तदा॥ द्वयोरैक्यं समं विश्वं विश्वमैक्यं समवर्तत॥१३॥ विभेदमतयो नष्टाः श्रुतिस्मृत्यर्थवाचकाः॥ पारेवरि ॥१३॥
॥२३॥ नोऽहेतुकाश्च सर्वे क्षयमागमन्॥१४॥ स्वलक्ष्मा गौरी त्यज्य पशुनिर्वाणापद्धतिम्॥ मन्दरे पर्वतश्रेष्ठे साम्भोर्नित्यसं
मे स्तुतो॥१५॥ प्रमथा योगिनश्चैव वर्ततेऽद्यापि निश्चला॥ इष्टि स्थिरं तं केशीनाविश्ववीजमनन्तका॥१६॥ महेश्व
४३ विष्णुसंयुक्ता साक्षात्तापपनाशिनी॥ योगिगेया या समस्ता च समस्ताधारगुणात्मिका॥१७॥ मुमुक्षवोऽपितं ध्यात्वा प्र
पाप्निपरं पदम्॥ चातुर्मास्ये विशेषेण ध्यात्वामर्त्यो हि मानुषः॥१८॥ तन्नो गच्छन्तु येते पंसर्देवः प्राप्नियास्यन्ति॥
इत्युक्त्वा भगवान् तेषां तत्रैवान्तरधीयत॥१९॥

चातुर्मास्ये विशेषेण तत्पूजा महाफ[illegible]ला ॥ अघप्रभृतिपैर्येषे विल्वपत्रैस्तु पूजिता ॥ विघास्यति महेशानि तेषां ज्ञान
मनुत्तमम् ॥ चातुर्मास्येऽधिकफलं विल्वपत्रं वरानने ॥ ३५ ॥ उमामहेश्वरप्रीत्यै दत्तं विधिवदक्षयम् ॥ यथा श्रीस्तु
लक्ष्मीवक्षे तथा विल्वे च पार्वती ॥ ३६ ॥ त्वं मूर्त्या दृश्यते विश्वं सकला भीष्टदायिनी ॥ चातुर्मास्ये विशेषेण सेविता
सौ महाफला ॥ ३७ ॥ इति श्रीस्कन्दपुराणे ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये इन्द्रादीनां शापप्रदानपैजवनो
पाख्यानं नाम चतुर्दशोऽध्यायः ॥ १४ ॥ पैजवन उवाच ॥ श्रीः कथं तु लक्ष्मीरूपा विल्ववृक्षे च पार्वती ॥ एतच्च वि
स्तरेणार्य मुने तत्त्वं वद प्रभो ॥ १ ॥ गालव उवाच ॥ पुरा देवासुरे युद्धे दानवा बलदर्पिताः ॥ देवान्निर्जग्मुः संग्रामे घोररूपाः
सुरेतराः ॥ २ ॥ देवाश्च भयसंत्रस्ता ब्रह्माणं शरणं ययुः ॥ ते दृष्ट्वा पितरं तत्र ब्रह्मस्पति पुरःसराः ॥ ३ ॥ तस्थुः प्रा
ञ्जलयः सर्वे तानुवाच पितामहः ॥ किमर्थं स्थानं निकरमस्मत्सविधमुपागताः ॥ ४ ॥ कारणं कथ्यतां मा भुवन्हीन्द्रवस
मिश्रिताः ॥ देवा ऊचुः ॥ दैत्यैः पराजिता स्तात संगरेऽद्भुतकारिभिः ॥ ५ ॥ वयं सर्वे पराक्रान्ता अतस्त्वां शरणं गताः ॥
त्राहि तस्मान्देवदेवेश शरणं समुपागतान् ॥ ६ ॥ तच्छ्रुत्वा भगवान्प्राह ब्रह्मा लोकपितामहः ॥ मया न शक्यते कर्तुं परा

तस्य ताप त्रयाभावो यैरश्वत्थो नराभवेत् ॥३१॥ दुःस्वप्नं दुष्टचिन्ता च दुष्टज्वरपराभवाः ॥ विलयं नय पापानि पिप्पलं तं हरिप्रिय ॥
॥३२॥ मंत्रेणानेन ये देवाः पूजयिष्यन्ति पिप्पलम् ॥ तत्तेषां धर्मो जायते धाकपकारकः ॥ अश्वत्थो [illegible] ने नापि प्राप्तो स्नानमङ्गले
भवेत् ॥ अनंतं हरति पापानि जन्मादो मरणावधि ॥३४॥ अश्वत्थसेवनं पुण्यं चातुर्मास्ये विशेषतः ॥ सुप्ते देवे यत्नमध्यमास्था
य भगवान् प्रभुः ॥३५॥ जलं पृथ्वी गतं सर्वं पिपिर [illegible] न्ति रसेवने ॥ जले विसृजेल्लले [illegible] विष्णुर्वरतो महान् ॥३६॥ नत्वा
हत्वा गतो विष्णुश्चातुर्मास्येऽघनाशनः ॥ सर्वभूतगतो विष्णुराप्याययति वै जगत् ॥३७॥ तथाश्वत्थगतं विष्णुं यो नमस्ये ॥२७॥
॥२८॥ न नारकी ॥ अश्वत्थं रोपयेद्यस्तु पृथिव्यां प्रयतो नरः ॥ तस्य पापसहस्राणि विलयं यान्ति तत्क्षणात् ॥ अश्व
॥३८॥
त्थः सर्वरक्षाणां पवित्रो मंगलान्वितः ॥ मुक्तिदो रोपितो ध्यातश्चातुर्मास्ये [illegible] धनाश
९६ नः ॥ अश्व [illegible] त्थ वरं सांद्रत्वा ब्रह्महत्या प्रजायते ॥३९॥ निष्कारणं सकृच्छित्वा नरके पच्यते ध्रुवम् ॥ मूले विष्णुः स्थितो
नित्यं [illegible] स्कन्धे केशव एव च ॥४१॥ नारायणस्तु शाखासु पत्रेषु भगवान् हरिः ॥ फलेऽच्युतो न संदेहः सर्वदेवैः

नेऽपि वह्निमुखा देवाः प्रजग्मुर्मन्दराचलम् ॥ तत्र मुक्तेन तेनैव दृष्टिदिव्या नामहेश्वरम् ॥ २० ॥ यथैनं विल्वपत्रस्योन
सींचतुर्थ्याशनाम् ॥ आदित्यो रुद्रनामं च पूर्वं चिन्त्यमजापिनम् ॥ २१ ॥ एते रुद्रा महात्मानः सर्वे देवाः ससंभवाः ॥ एते
षां स्मरणान्नादेव सर्वपापैः प्रमुच्यते ॥ २२ ॥ चातुर्मास्ये विशेषेण महापापविनाशनाः ॥ यदा नेत्रं दृष्टं देवादि भुव
नेश्वरम् ॥ २३ ॥ तदा काशीभवानी श्री महादेवान् यथार्चितः ॥ ईश्वरः सर्वभूतानां प्रसादस्य माश्रितः ॥ चातु
र्मास्येऽथ संप्राप्ते सर्वभूतदयाकरः ॥ अध्वरस्थोऽतः स दाते श्रीमन्दारे विशेषतः ॥ २४ ॥ निसमन्त्र [illegible] पतंस [illegible] ता
पं पानि सहस्रधा ॥ दृष्ट्वेन तम्मरतां देवैस्त्रिलोकीश्रोता [illegible] तं नयाकोऽ [illegible] तेषु पूजं एव च ॥ दध्रीनां दे
वस्तस्य पातकं तु विनश्यति ॥ २५ ॥ विष्णवः पूजितो ध्यातः [illegible] पापरोगविनाशाय चातुर्मास्ये विशे
षतः ॥ २६ ॥ अध्वरस्थं पूजितं सितं सर्वभूतसुखावहम् ॥ सर्वमङ्गलरूपं च सर्वपापौघहारिणम् ॥ २७ ॥ ये नराः कीर्तयिष्यन्ति नाम
पञ्चकं पवनात्मजम् ॥ न ते यान्ति यमलोकस्य भयं मार्गे प्रजापते ॥ २८ ॥ ॐ [illegible] नेश्वरं [illegible] पञ्चकारयेत् ॥

महोत्सवः ॥९॥ यस्या मूले हरिर्नित्यं स्कन्धे शंकरः स्वयम् । शाखासु भगवान् रुद्रः पुष्पे ब्रह्मा पितामहः ॥१०॥ पितरः पत्रेषु वसन्ति फलेषु
प्रजापतिस्तथा ॥ गंगापीरवचाथान्तु भज्जायां भगवान् भरः ॥१०॥ ईश्वरस्तु प्रशाखासु सर्वोऽयं हरवल्लभः ॥ हरकर्पूरधवलो
यथा वृक्षस्थितः सदा ॥११॥ तथा ह्ययं श्लक्ष्णरूपः पिप्पलः सोऽपि महाभगः ॥ चिंतितो हि नराणां हि पापसंशोषणाय च ॥१२॥ मनो
रथप्रदानाय जायते नात्र संशयः ॥ गुरुवारे समायाते चातुर्मास्ये तथैव च ॥१३॥ पूजितस्तु नतो यातः सर्वदुःखविनाशकः ॥
॥२४॥ देवद्रुमोऽयं देवबीजं परं यन्मूर्तं ब्रह्म ब्रह्मरूपस्य मागम् ॥ नित्यं सेव्यः अश्वत्थो विशेषात् राजन् चातुर्मास्ये सेवितः पापहा स्यात् ॥१५॥
॥१५॥ ०॥ इति श्री स्कन्दपुराणे ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्याने वनाराधनमाहात्म्यकीर्तनं नाम
षोडशोऽध्यायः ॥१६॥ ॐ ॥ ब्रह्मोवाच ॥ तुलसी रोपिता येन गृहस्थेन महात्मना ॥ न दृष्टस्तेन नरकं प्रजानात्तनाऽत्र
संशयः ॥१॥ तुलस्यादर्शनादेव पापराशिर्निवर्तते ॥ स्पृष्टे तु कथितान्येन तुलसी हरिवल्लभा ॥२॥ विष्णुप्रिया
२५ रं पानं प्राशिता तापापहारिणी ॥ यस्या मूले वसेल्लक्ष्मीः स्कन्धे सागरसंभवा ॥३॥ पत्रेषु सततं श्रीश्च शाखासु कमला

समन्वितः ॥४२॥ चातुर्मास्यविशेषेण यदि स्यात् पूज्यः समुक्तिभाक् ॥ तस्मात्सर्वप्रयत्नेन सेव्योऽश्वत्थसेवनम् ॥४३॥ यः करोति न
रो भक्त्या पापं यान्ति निर्दिनो भस्मतां वने ॥ स एव विष्णुर्द्रुमएवमूर्त्तो महात्मभिः सेवितपुण्यमूलः ॥४४॥ यस्याश्रयः पा
पसहस्रहन्ता भवेन्नृणां कामदुघो गुणाढ्यः ॥४५॥ ❁ ॥ इति श्रीस्कन्दपुराणे ब्रह्मनारदसंवादे चातुर्मास्यमाहा २४
त्म्ये पैजवनोपाख्याने अश्वत्थमहिमावर्णनं नाम पंचदशोऽध्यायः ॥१५॥ ❁ ॥ ब्रह्मोवाच ॥ पलाशोहरनृपोत्तमासे
सेव्यते हि द्विजातिभिः ॥ बहुभिश्चोपचारैश्च प्रयत्नात्तस्य सेवनम् ॥१॥ सर्वकामप्रदं प्रोक्तं महापातकनाशनम् ॥ प
लाशपत्रे पालाशं मध्यमं विष्णुस्थापितम् ॥२॥ वामे ब्रह्मा दक्षिणे च रुद्रः श्रीकृष्णतः ॥ पलाशपत्रे यो भुंक्ते
नित्यमेव नरोत्तमः ॥३॥ अश्वमेधसहस्रस्य फलं प्राप्नोत्यसंशयः ॥ चातुर्मास्यविशेषेण रागभोगप्रदं भवेत् ॥४॥
पयसा वाऽथवा दध्ना यो नरश्च विचारेण निःशेषयदि ॥ चातुर्मास्ये स्थितो ये तु तेषां नियमसंपदम् ॥५॥ इष्टपत्रैः पलाशस्य प्रात
रुत्थाय मानवैः ॥ नरकान्नाशुनिर्धूय गम्यते परमं पदम् ॥६॥ पालाशः सर्वदेवानामाधारो धर्मसाधनम् ॥ पत्र
नामन्तु वर्तितानां तत्र पू ज्यो महोत्तमः ॥७॥ यथा पञ्चवटेषु विशेषतः स्थानमेव मध्ये सर्वमयं ब्रह्मा हरो

आलवालांकुरानेभ्यश्च पावितं सकलं कुलम् ॥ यथा श्रीस्तुलसी संस्था नित्यमेव हि वर्द्धते ॥ १६ ॥ तथा तथा गृहस्थस्य कामदा हि प्र
॰भाषते ॥ ब्रह्मचारी गृहस्थश्च वाणप्रस्थो यतिस्तथा ॥ १७ ॥ तथा प्रमुक्तयः सर्वा तुलसीसेवनेरताः ॥ अज्ञुपायादिजायन्तेन
नासां दुःखदो हरिः ॥ १८ ॥ को हरिः सकलं च जगत विभाति नानारसेन परिभावितमूर्त्तिरेव ॥ व्रजाद्विलासभगमत्तोमला
दिव्यवी दुःखादिनाशानकरी सततं स्मृतापि ॥ १९ ॥ इति श्रीस्कन्दपुराणे ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये पैजवनो
पाख्याने तुलसीमाहात्म्यवर्णनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ ब्रह्मोवाच ॥ बिल्वस्य च समाहात्म्यं कथितं ने च धाम ॥२४॥
॥२४॥ ते ॥ न वो देशे न वक्ष्यामि महेन्द्र शृणु तत्त्वतः ॥ १ ॥ विहराश्रममापन्ना देवी गिरिसुता शुभा ॥ ललाटफलके तस्याः स्वेदबिन्दु
रजायत ॥ २ ॥ स भवान् पावनि त्रिष्टो भूतले निपपात च ॥ महातरुस्ततो जातो मन्दरे पर्वतोत्तमे ॥ ३ ॥ ततः प्रोल्लसुता तत्र
रममाणा यथा पावनः ॥ दृष्ट्वा वनगतं वृक्षं विस्मयोत्फुल्ललोचना ॥ ४ ॥ जयां च विजयां चैव पद्मा च कमला तथा
कोऽयं महातरुर्दिव्यो विभाति वनमध्यगः ॥ ५ ॥ इत्युक्ते रुचिराकारो महाहर्षकरो ह्ययम् ॥ जयोवाच ॥ देवि लेदद्य
संभूतो वृक्षोऽयं स्वेदबिन्दुजः ॥ ६ ॥ नामास्य कुरु वै क्षिप्रं पूजितः पापनाशनः

२८

स्वयम् ॥ इन्द्राद्यैश्चापि नित्यं फलेन्द्रीराद्धिसंभवा ॥ ६ ॥ तुलसी शुक्लकाष्ठस्था सा विश्वव्यापिनी ॥ गङ्गा सा पद्मवासा च ल-
चास्तु वे हरिप्रिया ॥ ५ ॥ सर्वरूपा च सर्वेशा परमानन्ददायिनी ॥ तुलसी प्राणजो मर्त्यो यमलोकं न गच्छति ॥ ६ ॥ शिरस्था
तुलसी यस्य न याम्ये ऽभिभूयते ॥ मुखस्था तुलसी यस्य निर्वाणपददायिनी ॥ ७ ॥ हस्तस्था तुलसी यस्य सतापत्रयवर्जितः
तुलसी हृदयस्था च प्राणिनां सर्वकामदा ॥ ८ ॥ स्कन्धस्था तुलसी यस्य स पापैर्न च लिप्यते ॥ कण्ठगा तुलसी यस्य जी-
वन्मुक्तः सदा हि सः ॥ ९ ॥ तुलसीसम्भवं पत्रं सदा वहति यो नरः ॥ मनसा चिन्तितां सिद्धिं सम्प्राप्नोति न संशयः ॥ १० ॥
तुलसीं सर्वकार्यार्थसाधिनीं कृष्णवारिणीम् ॥ यो नरः प्रत्यहं सिंचेन्न स पतति यमालयम् ॥ ११ ॥ या चातुर्मास्ये विशे-
षा वन्दिता पि विमुक्तिदा ॥ नारायणाज्जगत्ताते शत्याच्चागतं तथा ॥ प्राणिनां हृदयाल्लक्ष्मीस्तुलसी वर्तमानाश्रिता ॥ चा-
तुर्मास्ये समायाते तुलसीसेविता ॥ १३ ॥ तेषां पापसहस्राणि तायोलि १२ नित्यं सहस्रधा ॥ गोविन्दस्मरणं नित्यं तुलसी-
वनसेवनम् ॥ १४ ॥ तुलसीसेचनं पुष्पे चातुर्मास्ये विशिष्यते ॥ तुलसीं वर्द्धयेद्यस्तु मानवो यदि श्रद्धया ॥ १५ ॥
यदि

प्रसिद्धां धर्मसंस्थिं नागि...जातमात्र...॥ तोभजन्ति सुपत्रैः श्च पूजां मुनिसन्नाविनाम्॥ यं यं काममयन्ते कामं तं तं स्यां लभन्ते ध्रुव
मू॥ ...॥ महेश्वरी साक्षात् गिरिजा महेश्वरी विग्रह भूपाजन लोहरा ती॥ इत्थं द्विः यमलार मातृतं सनी नमो विल्व
मध्ये वाहका॥ ...॥ इति श्री स्कन्दपुराणे ... माहात्म्ये ... नाम ... विल्वा...
नामाष्टादशोऽध्यायः॥१८॥ श्रीः गालवउवाच॥ ...का काशानाथ ...श्री विरम पुण्यमहा॥ तेऽपि देवानरा श्रेष्ठ मह-
इ प्रामाद्भुताः॥१॥ यत्र स्थं च वदता यां वानुमीदये समायते॥ अपूजयं श्च विधिवद्देव नावे नमः शुभ॥२॥ वा ॥२०॥
॥२१॥ नुमौ स्वेः ध्वसं पूजां दे वो हि हिरात्मकः॥ प्रसन्नतो नु वा वाप मनाप्र...नृप्य क॥३॥ पूजां ... पदे यशाम...
शनपरायणाः॥ मृ रा धं सां श्वा धिकारा नम शांत प्रनचाहता॥४॥ ...तो देवदेवेशा वेकन्नूक्ष्यरोपता॥ गणानां
देवतानां च ब्रह्मादिनिर्मेदं तां...॥ तत॥५॥ नयन्तौ तौ ... वा मूव नुरादिं दमो॥ तेपि दंचानि राबाधाह ध्वि
तौ श्रमेदतः॥६॥ प्रपद्य ... लाभं श्वा धिकारान् विमानगता कोटि भिः॥ गालव उवाच॥ न यान ... पि ने देवा पार्वत्या
मायाविमोहिताः॥७॥ नु भौ तौ विल्वपत्रै श्च पूजां पितामह प्रवरीम्॥ प्रसन्न वदना ... त्वाप्रत्यापत्य पुनः पुनः॥८॥

27

पार्वत्युवाच ॥ यस्मात् त्वोत्पत्तिं भित्वा विनिष्क्रान्तोऽयं महानतः ॥ [illegible] ॥ उत्पन्नश्च समीपे मे तस्मात् बिल्वो भवत्वयम् ॥ अयं परं
ममातापभक्तितः पत्रैः संचयसम् ॥ आहरिष्य[illegible] यो राजा भवित्यैव भूतले ॥ [illegible]ष्यति मे पूजां पत्रैः [illegible]ममां
नितः ॥ ८ ॥ यं यं काममभिध्याये तस्य सिद्धिः प्रजायते ॥ यो ऽत्र बिल्वं च [illegible] मानपि करिष्यति ॥ [illegible] ॥ पुत्र
नार्थी यः विधेये धनहीनं न संशयः ॥ एतानेव प्रधाने पत्रैर्[illegible] नोपदः ॥ [illegible] ॥ तस्य पापसहस्राणि नश्यन्ति
बिल्वपत्रप्रमोपरि पत्राग्रं [illegible] करोति यः [illegible] ॥ [illegible] ॥ नेपाली [illegible] [illegible] ॥ [illegible] ॥
इत्युक्त्वा पार्वती [illegible] जगाम भवनं स्वकम् ॥ सखीभिः सहिता देवी गौरी पितृसमन्विता ॥ १३ ॥ वायुरुवाच ॥
अयं बिल्वतरुः श्रेष्ठः पवित्रः पापनाशनः ॥ तस्य मूले स्थिता देवी गिरिजा नात्र संशयः ॥ १४ ॥ स्कन्धे [illegible]
देवी [illegible] महेश्वरी ॥ पत्रेषु पार्वती देवी फले [illegible] स्मृता ॥ १५ ॥ [illegible] गौरी [illegible] मध्य
पल्लवे ॥ १६ ॥ दुर्गा [illegible] ॥ १७ ॥ [illegible] सर्वेषु [illegible] ॥ प्रातः

देवत्वं प्रस्तुतानां च साध्यानूपेराराशिनी ॥ अनूपा सर्वनूपा त्वं जनसंतानदायिनी ॥ २० ॥ फलवेला महाकाली महालक्ष्मी सरस्वती ॥
ओंकारस्त्वं वषट्कारस्त्वमेव हि सुरेश्वरि ॥ २१ ॥ भूतधात्रि नमस्तेऽस्तु शिवायै च नमोऽस्तु ते ॥ रागिन्यै च विरागिन्यै विकारा
जे नमः शुभे ॥ २२ ॥ एवं स्तुत्वा प्रसन्नाक्षी प्रसन्नेनान्तरात्मना ॥ उवाच परमोदारं मिथ्यारोषप्लुतं वचः ॥ २३ ॥ मद्रूपो ना
न्यथाभावी जनार्दन तवाप्यपमम् ॥ तत्रापि संस्थितस्त्वं हि योगी प्रवर विमुक्तिदः ॥ २४ ॥ कामप्रदश्च भक्तानां चातुर्मास्ये
विशेषतः ॥ निम्नगा गण्डकी नाम प्रसन्ने सो दयिता सुता ॥ २५ ॥ यामसा सारसंभूता पुण्यपरा तु महाजला ॥ नद्याः सुवि
॥२५॥ मले नीरे नववासो ॥ भविष्यति ॥ २६ ॥ चतुर्विंशतिभेदेन पुराणाग्ने निरीक्षितः ॥ कण्वे जातो जनार्दन चैत्र शालग्रामः प्रकी ॥२८॥
र्तितः ॥ २७ ॥ वर्तुलश्च जसः पिप्यः श्रियायुक्तो भविष्यति ॥ सर्वसामर्थ्यसंयुक्तो योगिनामपि मोक्षदः ॥ २८ ॥
ये लोकाः शालग्रामं विष्णुं पूजयिष्यन्ति मानवाः ॥ ते यान्ति विजितात्मानो हिमकानां संप्रपञ्चसि ॥ २९ ॥ शिलाग
तं च देवेशं तुलस्याः सन्निधौ पराः ॥ पूजयिष्यन्ति मनुजास्ते यान्ति मुक्तिं न दूरतः ॥ ३० ॥ शिलाख्यं च यः
तत्र विष्णुं प्राप्नोति मागतम् ॥ सुचक्राङ्कित सर्वाङ्ग नमस्ते समालयम् ॥ ३१ ॥ ब्रह्मोवाच ॥ २०२

साप्रोवाच ततो देवान् विश्वमातानुसंस्तुता ॥ मम शापो वृथा नैव भविष्यति सुरोत्तमाः ॥ ९ ॥ तथापि कृतपापानां मोरवा
णिकपांचवः ॥ स्वर्गे हि ब्रह्मणा नैव भविष्यथ सुरोत्तमाः ॥ १० ॥ मर्त्यलोकं संप्राप्य प्रतिमाश्च सर्वशः ॥ सर्वदेवा
श्च वरदाः लोकानां प्रभविष्यथ ॥ ११ ॥ पाशिराग्महेशा विहिता ये कुमाराः कुमारिकाः ॥ तेषां तेषां प्रजार्थे चैव भ
विष्यथ न संशयः ॥ १२ ॥ इत्युक्ता सा भगवती देवतानां वरप्रदा ॥ विष्णुं महेश्वरं चैव प्रोवाच कुपिता भृशम् ॥ १३ ॥
देवास्तस्या भयाल्लब्धा मर्त्येषु प्रतिमां गताः ॥ भक्तानां मानसं भावं पूरयन्तु सुसंस्थिताः ॥ १४ ॥ तस्माद्विष्णो महेश्वरा
न त्वयापि न निषेधितः ॥ तस्मात्त्वमपि पाषाणो भविष्यसि न संशयः ॥ १५ ॥ हरोप्यश्ममयं रूपं प्राप्स्यते पपिकाहितम् ॥
लिंगाकारं विप्रशापान्ममदुःखमवाप्स्यति ॥ १६ ॥ तच्छ्रुत्वा भगवान् विष्णुः पार्वतीमनुकूलयन् ॥ उवाच प्रणतो भूत्वा
हरभार्यां महेश्वरीम् ॥ १७ ॥ श्रीविष्णुरुवाच ॥ महाव्रते महादेवि महादेवप्रिया सदा ॥ त्वं हि सत्त्वरजस्तथा च तामसी
शक्तिरुत्तमा ॥ १८ ॥ मात्रात्रयसमोपेता गुणत्रयविभाविनी ॥ मायादीनां जनित्री त्वं विष्णुव्यापकरूपिणी ॥ १९ ॥

कारकाः॥ तिलोदकेन स्नानां सेचनं सर्वकामदम्॥८॥ तीरस्थाः तीरयुक्ते जोषैः सिताः शुभप्रदाः॥ चतुष्टयं च स्नानानां म
हीकं पूर्वनामसु॥९॥ चातुर्मास्ये विशेषेण सर्वकामफलप्रदम्॥ प्रलानुयट मासित्यप्राप्ति नां सर्वप्रदः॥१०॥ सावि
त्रीजलमा [illegible] स्यास्य पवित्रं भवेनमूषणाम्॥ तुष्ट्ये देवे विशेषेण तिलस्नानं महाफला॥११॥ तिलाः पवित्रमतुलं नि
॥२९॥ त्याधर्मार्थसाधकाः॥ तिलानामेव प्रदाभक्ष्ये च तिलाः पापापहारिणः॥१२॥ तिला॥ विशेषफलदा तिलाः॥ चातुर्विन ॥२९॥
शनाः॥ तिलाः सर्वक्रतुरपशुप्रथमं समुद्भवाः॥१३॥ नतिला धान्यमित्याहुर्देवधान्यमिति [illegible] तम्॥ तस्मात्स
र्वेषु दानेषु तिलदानं महोत्तमम्॥१४॥ कनकेन कृतायेन तिलादानां सुप्रदज्ज॥ ब्रह्महत्यादिपापानां विनाशस्तेन चे
कृतः॥१५॥ सावित्री च तिलाः प्रोक्ताः सर्वकार्यार्थसाधकाः॥ तिलैस्तु तर्पणं शं कुर्याच्चातुर्मास्ये विशेषतः॥१६॥ तिला
२७ नां दर्शनं पुण्यं स्पर्शनं सेवनं तथा॥ हवनं भक्षणं चैव शरीरे धारणं तथा॥१७॥ सर्वपातिलयज्ञो पंचदर्शनीरक्ष
पापहा॥ चातुर्मास्ये विशेषेणासेवितः सर्वसौख्यदः॥१८॥ महेन्द्रोपवमास्थाय हित्वितो [illegible] हितेरतः॥ पञ्चस्व सेवनं

इति ते कथितं सर्वं शालग्रामैककारणम् ॥ यथा स भगवान् विष्णुः पाषाणत्वमुपागतः ॥ ३२ ॥ गोविन्दोपि महाशापं लब्ध्वा [illegible]स्य
भवनं गतः ॥ पार्वती च महेशानं कुपिता प्रणाममथाब्रवीत् ॥ ३३ ॥ एवं स एव भगवान् भगमूर्त भव्यभूतादिकृत् सकलसंस्थितिना
शनांकः ॥ सोपि श्रीपार्वतीसहितो गिरिशापध्यासार्द्धं चतुर्षु चन्द्रमेषु निवासमाप ॥ ३४ ॥ ॐ ॥ इति श्रीस्कन्दपुराणे ब्र
ह्मनारदसंवादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्याने विष्णुशापो नाम एकोनविंशोऽध्यायः ॥ १९ ॥ ब्रह्मो
वाच ॥ एकदा पप्रच्छ मतिद्धिं यत्नेन राजा वृद्धं नृपिराः ॥ चातुर्मास्ये समायाते सर्वे देवाः निवासिनः ॥ १ ॥ भगवन् के सुरास्तेषु केषु
केषु निवासिनः ॥ एतद्विस्तरतो ब्रूहि मम आत्मने कास्यपा ॥ २ ॥ गालव उवाच ॥ अग्निस्तं जलमित्याहुश्चातुर्मास्ये तदिन्द्रस
लोकसं विधृतं देवैः पिबन्ति द्रुमदेवताः ॥ ३ ॥ तत्स्थपानान्महात्म्यं प्रजायते नात्र संशयः ॥ बलं तेजश्च कान्तिश्च
सौष्ठवं च भुविक्रमः ॥ ४ ॥ गुणा एते प्रजायन्ते पानात्कुंभसंभवात् ॥ नित्यमग्निस्थपानेन बलं त्वं च प्रजापते
॥ ५ ॥ भोजनं तत्प्रवर्धते नित्यमेव न संशयः ॥ तस्माच्चातुर्मासे तु पिबन्ति जलमिच्छया हि ॥ ६ ॥ पंचराष्ट्राः पितरो देवाः
साधिता नाहि न कास्यपा ॥ एतेषां सेवनं ओ हं सर्वमासेषु सर्वदा ॥ ७ ॥ चातुर्मास्ये [illegible] विशेषे [illegible] राजते विनताः सेव्य

बदरी शाकमधे न च ॥ यत्फलं जायते नृणां जंबुकाद्द्विजभोजनात् ॥३१॥ तस्मिन् ... दिनैरेकभक्ते कार्येण तेन ... ते दा॥
बहुना च किमुक्तेन जंबूवृक्षप्रपूजनात् ॥३२॥ पुत्रपौत्रधनैः पुंसो जायते नात्र संशयः॥ जंबूमेवैः परिवृता विद्युन्नाशो मह
वचा॥३३॥ वसुभिः स्वीकृता नित्यं प्रियाऽश्वत्थ महानगः॥ आदित्ये तु जपा रुद्रो लोध्रश्विभ्यां मदनस्तथा॥३४॥ विश्वे
भिः स्वच्मधूकश्च गुग्गुलुः पितृनाशने॥ सूर्ये गार्कः पवित्रश्चासौ मनाधात्रिपञ्चकः॥३५॥ खदिरो भूमिपुत्रेणाश्व भ॰ ८
 पामार्गो ... बुधेन॥ अश्वत्थो गुरुणा चैव शुक्रेणाविदुरस्तथा॥३६॥ शमी शनैश्चरेणापि स्वीकृता शूद्र ... जाति
भिः॥ पद्मराज्ञ्योक्ता दूर्वा पितृणां तु परोचिता॥३७॥ विष्णोश्चैव प्रिया नित्यं चातुर्मास्ये विशेषतः॥ किन्तु नास्ति कर्ता
धर्मो पार्थिके पास्महप्रभाः॥३८॥ विनायकेन धुनं कर्म संपूर्णं नैव जायते॥ पाद्मे ... नां पदवि ... नंगस्ता नं च मंगलं॥
॥३९॥ मुमूर्षूणां मोक्षहेतुर्गो धरासंस्थो महाद्रुमः॥ अस्मिन् पुंसां निसतते भक्तेन विभुषिताः सदा॥४०॥ मूलेन मध्येन
पार्श्वे च पक्ष्ये नामापि ते प्रियदम्॥ अन्येपि देवाः संतानं ... सर्वमहाद्रुमाः॥४१॥ प्रवर्तते तु मासे ... चातुर्मास्य

ययो

प्राप्य दर्शनं स्पर्शनं तथा ॥१९॥ पवै स्तुतस्ततो कुर्यात् देवानां दर्शमन्ययम् ॥ प्रजानां पतयः सर्वे चूतवृक्षमुपाश्रिताः ॥२०॥
गंधर्वाम्लपं वृक्षमगरुं गणनायकः ॥ समुद्रा वेतसं वृक्षं पन्नाग पुन्नागमेव च ॥२१॥ नागवृक्षं तथा नागाः सिद्धाः कंको
लकं द्रुमम् ॥ गुह्यकाः पनसं चैव किन्नराः महिचाः स्मृताः ॥२२॥ षष्ठीमश्वत्थं समाश्रित्य कंपयो ऽभूत्पुर स्थिताः ॥
स्कांजनं महावृक्षं वन्हिरुपाश्रित्य तिष्ठति ॥२३॥ यमो विभीतकं चैव वटवृक्षं ने नाधिपः ॥ पतुरगाः खर्जूरीवृक्षं पूग
वृक्षं च मारुतः ॥२४॥ धनदो बोलकं वृक्षं दाक्षवदरीद्रुमम् ॥ सप्तर्षीणां महतां जावकृष्णश्यामेर वैतः ॥२५॥ जंबूमघैःपरिवृ
तः कृष्णवर्मो ऽधनाशनः ॥ कृष्णस्य सह शोबुसी स्नेनजंबू नेमोलमः ॥२६॥ तस्मै लेवी सुदेवस्तु प्रीतो भवति दानतः ॥ जंबूवृक्षं
समाश्रित्य कुर्वीत द्विजभोजनम् ॥२७॥ तेषां प्रीतो हरिर्दद्यात् पुरुषार्थचतुष्टयम् ॥ चातुर्मास्ये समायाते सुप्ते देवे जना
र्दने ॥२८॥ ब्राह्मणान् भोजयेयस्तु सपत्नीकान् शुचिस्थितः ॥ तेन नारायणस्तुष्टो भवेत् लक्ष्मीसहायवान् ॥२९॥
लक्ष्मी नारायण प्रीत्यै वस्त्रालंकरणैः शुभैः ॥ परिधाप्य सपत्नीकान् कृतकृत्यो भवेन्नरः ॥३०॥ यद्वात्रिंशत् ये नैव

प्रसादितागताशाप्राप्यन्क्रोपान् तु स्तुभ्यं तेजसा ॥२॥ कथं स भगवान् इन्द्रो भार्या शापमवापह। वैकृतं नृपमाश्रित्यप्रनाद्यं
यक्षःश्रितः ॥४॥ गालव उवाच ॥ देवान् नृपाद्या हृष्पानि कृत्वा दैत्या महाभयान् ॥ मनुष्यलोके सकले प्रतिमासु च संस्थि
॥३१॥ ताः ॥३॥ तेषामपि प्रसन्नानामनुग्रहं समुपाकरोत् ॥ विष्णुस्तु ना महाभागा विप्रवमाना ऽ धुना पि ते ॥४॥ ते चांधना ॥३१॥
वेपार्वत्याः शापभीरयापं त्रैतः ॥ तं नित्यमेवानुनयन्नूचे प्रीवाच शंकरम् ॥५॥ रते देव्याः विश्वपूज्या दिव्यस्वरूप
परप्रदा ॥ मत्प्रसादाद् विष्णा निर्मान्केन तश्चौ षिताने रे: ॥६॥ वामतेमम कोमेदं कांतं साधु विनिन्दितम् ॥ तेषां विवाह
३१ जसि च प्रत्यक्षतः सर्वसान्निके: ॥७॥ पत्न्यप्रमहजानां च गमनं चकैरायिरााम् ॥ मंदिरेश्च चतुरा: हृसो देवता
श्चापि वन्स्मा: ॥८॥ चतुर्दिक्ष्वंगासंयुता कौ देवप्रान्तरा संयुता: ॥ एतेषामग्रजो दिव्यं कृत्वा त्वं जनसंसदि
॥९॥ मम दासत्वमापन्नो ममिपार्श्वे धकृपा: ॥ गेहे वा गपुनसन्मार्गो प्रवर्तन्ते जनेषु वै ॥१०॥ निर्वास: सर्वतो
वेषप्रच्छन्न: शूपनेना ॥ क्षेत्रे या पिपिपताक्षाग्नः प्राप्यापि गञ्जः स्वयम् ॥११॥ तत्रिवैश्लागःशाख्यो भाष्ये पाचपतिस्तथा ॥

नसंशयः॥ चातुर्मास्ये देवपत्न्यः सर्वा वृक्षीः समाश्रिताः॥ ४२॥ प्रयच्छन्ति नराणां कामान् वांछितान् सेविता अपि॥ तस्मा
त्सर्वात्मभावेन पिप्पलोऽपि न सेवितः॥ ४३॥ सेविताः सफलाः वृक्षाः चातुर्मास्ये विशेषतः॥ तुलसी सेविता येन सर्व
वृक्षास्तु सेविताः॥ ४४॥ आप्यायितं जगत्सर्वं माब्रह्म लौंव सेवितम्॥ चातुर्मास्ये गृहस्थेन वानप्रस्थेन वा पुनः
॥ ४५॥ ब्रह्मचारी यतीनां च सेविता मोक्षदायिनी॥ एतेषां सर्ववृक्षाणां छेदनं नैव कारयेत्॥ ४६॥ चातुर्मास्ये विशे
षाद्विना यज्ञादिकारणम्॥ एतदुक्तं मया येषां यत्न्यक्षोऽहमिहत्वया॥ ४७॥ यथा वृक्षत्वमापन्ना देवाः सर्वे
ऽपि शूद्रज॥ ४८॥ अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दश तिन्तिणीश्च। कपित्थबिल्वामलकीत्रयं
च एतान् वृक्षान् नरकं न पश्येत्॥ ४९॥ सर्वदेवा विश्वरूपे शेषाश्च कुसुमाधाराः॥ कुसुमं च यामृकाश्च पु
स्मिन्नदेवे सेविते विश्वपूज्ये सर्वेऽत्र पूजा पत्ते विश्वमेतत्॥ ५०॥ ॐ इति श्रीस्कन्दपुराणे ब्रह्मनारदसंवादे चातुर्मा
स्यमाहात्म्ये वृक्षमाहात्म्यकथनं नाम विंशोऽध्यायः॥ २०॥ ब्रह्मोवाच॥ पार्वती कुपिता देवी कथं देवेन शूलिना॥

ईं तु मन्दि महेश्वरः ॥२५॥ प्रसन्नलोचनां ज्ञात्वा किंचिन्माहेश्वरस्ततः ॥ कोपेन कलुषं वक्त्रं पूर्णचंद्रसमप्रभम् ॥२६॥ कस्मात्त्वं कु
रुषे देवि पूर्णामेवं वचो नते ॥ सर्वभूतदया कार्या मया नाहि [illegible] हितेच्छया ॥२७॥ वधपीडे [illegible] पिमत्सार्थेन कार्य्यपरपीडनम् ॥ जग
त्सर्वं मया प्राप्तेन वासिवर [illegible] ॥२८॥ जगत्सृष्ट्या त्वमेवैका सर्वभूतधरा नत्वे ॥ मयायाहि कातं [illegible] कमे ये पंरे च हितायवै ॥ त
थाप्येवं भविष्यति न संशयः ॥ अथवा मम सर्वेभ्यः प्राणोप्योपि गरीयसी ॥३०॥ यदिच्छसि तथा कुर्य्यां तथा तव मनोरथान् ॥ प्रसन्न
वदना भूत्वा कथयस्व वरानने ॥३१॥ [illegible] भगवती उवाच [illegible] महेश्वरम् ॥ चातुर्मास्ये च संप्राप्ते महाव्रतधरो यदि ॥३२॥ देवतानां
॥३३॥ चमर्त्यानां नाश्रवं नत्वे यदि ॥ पापिनां [illegible] महेश्वर ॥३३॥ [illegible] ॥ शाप ॥३३॥
स्यात्र महं कुर्य्यां प्रसन्नवदना सती ॥३४॥ नान्यथा मम वचनं [illegible] विप्रवास मनुगच्छति ॥ [illegible] भगवां [illegible] स्तु [illegible] ति
मनुवाचनाम ॥३५॥ सा पृष्टा भगवती शापस्यानुग्रहे [illegible] हता ॥ इदं पुण्यं [illegible] मनुजः [illegible]
32 प्राप्नुयात् [illegible] ॥ तस्याक्षय्यं जीवितं सर्वेषि [illegible] सत्यात्त [illegible] प्रयान्ति ॥३७॥ इति श्रीस्कन्दपुराणे ब्रह्मनार
दसंवादे चातुर्मास्यमाहात्म्ये पार्वतीतपो नामैकविंशोऽध्यायः ॥२१॥ ब्रह्मोवाच ॥ इदमाश्चर्य्यरूपं मया [illegible] भाति

उन्मार्गगामिनं श्रेष्ठमपि वेदान्तपारगम् ॥ १२ ॥ नीचैरपि प्रशास्येत श्रुतिराहननाननी । सन्मार्गस्य सर्वत्र पूज्यते नापथः क्वचित्
॥ १३ ॥ येन स्वकुलजो धर्मस्त्यक्तः स पतितो भवेत् ॥ स्तेनश्च नरकं प्राप्य दुःखभोगे साभुज्यते । १४ । धर्मं त्यजति नास्तिक्या
तिभेदमुपागतः ॥ स निग्राह्यः सर्वज्ञैर्मनुधर्मपरायणैः ॥ १५ ॥ कुलधर्मान् जातिधर्मान् देशधर्मान् महेश्वर । ये त्यज
न्ति जना ये स्वयं कुलस्य पतिता हि ते । १६ । अग्नित्यागो व्रतत्यागो वचनत्याग एव च । धर्मत्यागो नैव कार्यः कुर्वन् पतित
एव हि ॥ १७ ॥ न पिता न च ते माता न भ्राता स्वजनोऽपि च ॥ पतितेन तव वार्त्ता च भस्म भस्मत्वमदन् विषम् । १८ । अस्थिमालावि
नाभस्म जटाधारी कुचेलवान् ॥ चपलो मुक्तकेशश्च स्प्रष्टुं नार्हसि मां गतः ॥ १९ ॥ अक्रन्दन् यो व्रती भिक्षुर्दुष्टात्मा कपटी स
दा ॥ नार्हसि त्वं मम गुरुः संभाषयितुमीश्वरः ॥ २० ॥ एवमुक्त्वा ततो देवी बाष्पव्याकुललोचना ॥ महादुःखयुता आसीद्दे
शेऽनुनयत्यपि ॥ पुनरेव प्रकुपिता हरं प्रोवाच भामिनी ॥ न वा जीवं न हृदयं फणिनं वेभि नित्यदा । २२ । अहल्मौ त्व
मुरे उक्तं तन्म... बाप्रतिभाति मे ॥ यस्मान्मयि महद्दुःखं भावरूपं ...न त्वया । २३ । प्रालेयाचलपुत्री तापस्मा भूले
रोषत्वं हनिष्यति ॥ एवमुक्ता भगवती पुनराह न किंचन ॥ २४ ॥ ईश्वरः प्रसन्नवदनामुपचारैरथाकरोत् ॥ ध्याने नैमित्तिमपेक्षे

॥ ३३ ॥

नारदो रैवतो व्यासः शुकद्वैपायनादयः ॥ अंगिराश्च मरीचिश्च कर्दमश्च प्रजापतिः ॥ १५ ॥ कश्यपो गोतमश्चात्रिर्वसिष्ठोऽथ भृगुरेव च ॥ जमदग्निस्त
थोलंकोरामो भार्गवश्च ॥ १६ ॥ अगस्त्यश्च पुलोमा च पुलस्त्यः पुलहस्तथा ॥ प्रचेताश्च क्रतुश्चैव व्रतयो वान्ये महर्षयः ॥ १७ ॥ सिद्धा यक्षाः
पिशाचाश्चाप्सरोगणाश्चारणाः सह ॥ आदित्या गुह्यकाश्चैव साध्याश्च वसवोऽश्विनौ ॥ १८ ॥ ते सर्वे तत्र इन्द्राद्या ब्रह्मविष्णुपुरोगमाः ॥ समा
जग्मुर्महेशस्य सन्त्यदर्शनलालसाः ॥ १९ ॥ ततो गणा नन्दिमुखा रत्नानि प्रददुस्तथा ॥ भूषा यानि च वासांसि मुन्यादिभ्यो यथाक्रमम् ॥ २० ॥
नतो वा प्रसह लेभुर्वाहिने शुभसमं तनः ॥ सर्वैर्जय प्रति चैवोक्तो भगवान् श्रुतमादिशन् ॥ २१ ॥ भवानी हृष्टहृदया महादेवमवलोकयत् ॥ जया च
विजया चैव जयन्ती मंगला तथा ॥ २२ ॥ चतुष्पथस्य मध्ये गिरिराजसुतानना ॥ तस्याः सान्निध्ययोगेन जगन्मातिगुणोत्तरम् ॥ २३ ॥ य
स्याः धात्रीजाः शोभाः वर्णितुं नैव शक्यते ॥ इह प्रोपिंगलाक्षो … र्नानावक्त्रा गिरीशिनः ॥ २४ ॥ पिशाचा भूतसंघैश्च ततः परम
श्रीमनः ॥ स्वर्णवेत्रधरो नन्दी बभौ कपिमुखोऽग्रतः ॥ २५ ॥ विद्याधराश्च गन्धर्वाः किन्नराः सेनापदस्तथा ॥ चित्रन्यस्ता इव मुनीन
नागा मुनीश्वराः ॥ २६ ॥ श्रीरागप्रमुखा रागास्तस्य पुत्रा महौजसः ॥ अमूर्ता मूर्तिमन्तो वै पुत्रा हरदेहसमुद्भवाः ॥ २७ ॥ इत्येकस्वच्छ स
इत्याद्याः सर्वासां च पितामहः ॥ ताभिः सहैव ते रागा नीलावस्त्रधरास्तथा ॥ २८ ॥ प्रादुर्बभूवुः सहसा चिन्तितास्तेन शंभुना ॥ तेषां ना
मानि तेन च … त्वं महाधन ॥ २९ ॥ श्रीरागः प्रथमः पुत्र ईश्वरस्य विमोहनः ॥ श्रीसंतापके … प्र

॥ ३३ ॥

३३

ब्रं मम १

पचत्तश्च ॥ प । पूर्णिमास्यान् महाश्वेषी वदन्त तत्र सुव्रत ॥१॥ तस्यापि भाग्ये नमस्तुयैये मि कुहं गतः ॥ नतत्स्यैतन्मुखांभोजांच्युतनाथ्यामृतं
पिवनः ॥ २ ॥ पिवन् गौरी कथाख्यानं विशेष गुणपूरितम् ॥ कथं मे शङ्करेणत्वं चकार सुसंवृतः ॥३॥ चातुर्मास्य कथं जातं
किं नाम संव्रतमुच्यते ॥ अनुग्रहं कृतवती सा कथं को समनुग्रहः ॥४॥ एतन्निश्चरतो ब्रूहि पृच्छतो मे द्विजोत्तम ॥ भगवान् पूज्यते
लोके मम मानुग्रह कारकः ॥५॥ प्रसन्नवदनो भूत्वा स्वस्थः कथय सुव्रत ॥ गालव प्रचोदितेच्छु त्वा प्रनराह महर्षिवान् ॥६॥ गाल
वउवाच ॥ इतिहासमिमं प्रयाप्य कथयामि तवानघ ॥ शृणुष्वावहितो भूत्वा यत्नापुत फलप्रदम् ॥७॥ चातुर्मास्ये प्रसङ्गं प्राप्य हरो
भक्तिसमन्वितः ॥ भक्तचर्यव्रतपरः प्रहृष्ट वदनोऽभूत् ॥८॥ देवतानां च सङ्कल्पं महर्षीणां चकार ह ॥ समागत्य ततो
देवा मन्दराचलमास्थिताः ॥९॥ प्रतास्यते महेशानं तस्थुः प्राञ्जलयोऽमराः ॥ नानुवाच सुरान् सर्वान् हरो हृष्टः समागता
न् ॥१०॥ पार्वत्याभिहितं प्राह कस्मिन्काल्यां लेरस्मिति ॥ मयाभिप्रतेऽभिनये यत्र साहाय्य कारिताः ॥११॥ भवंति निःपुरोगाश्च
चातुर्मास्ये समागते ॥ तेन यो ग्रहणं संहृष्टा नमस्कृत्य च आलिनम् ॥१२॥ लक्षं स्थे तेन माजन्तु विमानैः सूर्यसन्निभैः ॥ तथा था
ऽन्युत्लप्नसे चतुर्दश्यां महेश्वरः ॥१३॥ प्रननर्त मिनुमोर्मे भाःवा मीतो ऽऽवराय च ॥ मन्दरे पर्वतश्रेष्ठे नन्तजेन्मुमहर्षयः ॥१४॥ ॥

हनोपेतास्वभर्तृ स्वहिताः स्थिताः ॥ ब्रह्मा मृदंगवाद्येन तोषयामास शंकरम् ॥४६॥ चतुरस्वरवाद्येन तुम्बाघं चाकरोत्तु नः ॥ तालकिंशां महे
शानृत्यं शामास केशवः ॥४७॥ वायव स्तत्रवाद्यं च चक्रुः सुस्वरमोजसा ॥ महेन्द्रो वंशवाद्यं च सुभगं सुस्वरं बहु ॥४८॥ वह्निः शृङ्गर
वे चक्रे परां वं चैव पावने ॥ उपांगवादनं चक्रे सोमः सूर्यसमन्ततः ॥४९॥ घंटानां वादनं चक्रे गणा... प्रातः सहस्रशः ॥ मुनीश्वरास्त
थो देवाः पार्वतीसहितास्तथा ॥५०॥ स्वस्विभद्रास नेत्रे ते तुष्टुविष्णुं यशोकरं ॥ दंकानां वादनं चक्रे वैनवः समहोरगाः ॥
॥५१॥ भेरी ध्वनिं तत्यासाध्याश्चाप्यन्ये सुरोत्तमाः ॥ भूरभूरी गोमुखादी निःस्वान ध्वान वकर्णे हो तत्र वे ॥५२॥ तंत्रीलयसमायु ॥३४॥
॥३५॥ क्तागंधर्वा मधुरस्वराः ॥ सुपर्णश्शृंगनादं च चक्रुः सिद्धाः समन्ततः ॥५३॥ ततस्तु भगवानासीन्महानटवे पुधरः ॥ मुकुटः पंच
शीर्षैस्तु पल्लगैरुपशोभितः ॥५४॥ जटाधिमुच्यसकला भवभूतो भूषितविग्रहः ॥ वासुभिर्दशभिर्युक्तो हारके यूरसंयुतः ॥५५॥ लैलो
क्य व्यापकं रूपं सूर्यकोटि समप्रभम् ॥ कृत्वा नननृते भगवान्भोसुरं सम्महानगे ॥५६॥ ततं वीणादिकं वाद्यं कांस्यतालादिकं घनं
॥ वंशादिकं तु वादित्रं शोमरादि च नानकम् ॥५७॥ चतुर्विधं ततो वाद्यं तुमुलं समजायत ॥ नानानां परहादीनां हस्तकानीत घेववा ॥
॥५८॥ मानानां चैवगानानां प्रत्यक्तं रूपमाचभौ ॥ तुकंठं तुल्यं तुम्बुकं तुआंभीरं महास्वनम् ॥५९॥ विश्वावसुर्नारदश्च तुंबरश्चेव गायकाः ॥
जगुर्गंधर्वपतयः कराश्च मधुरस्वराः ॥६०॥ ग्रामत्रयसमोपेतं स्वरसप्तकसंयुतम् ॥

दायकः ॥ ३० ॥ तन्मध्याद्भैरवो माहेशात्समुद्भूतो गणोत्तमः ॥ द्वितीये ऽथ वसन्तो ऽभूत्कण्ठदेशान्महाप्रभाः ॥ ३१ ॥ महदंकस्थभूतानां चक्राद्वैर
विशुद्धतः ॥ पंचमस्तु ततो ऽभूत्तु तो विश्वविभूषणाः ॥ ३२ ॥ मेहस्वरहृदे जातः चक्रं चैव अनाहतम् ॥ नासादेशात्समुद्भूतो भैरवो
भैरवः स्वयम् ॥ ३३ ॥ मणिपूरकनामेदं चक्रं तद्धि विमुक्तिदम् ॥ पंचास्यवदनश्चावेश्मा श्रेकानाम महेश्वरात् ॥ ३४ ॥ रागाणां द्वादश
तथानन्तत्वाद्यौत थेवच ॥ स्वाधिष्ठानसमुद्भूता जगद्बीजसमन्विताः ॥ ३५ ॥ ततो नट्टश्च मायान्तिन ततो रेतः प्रवर्त्तते ॥ रेतसस्तु
जगत्सृष्टं नदी राजन नेन्द्रियम् ॥ ३६ ॥ आधार चमस्तन् षष्ठो नट्टो नारायणो ऽभवत् ॥ महेशवदनः भाःपुत्रो नीलो विष्णुपराक्रमः ॥
३७ ॥ एते मूर्तिधरा रागा जाता भार्याः सहाग्निनः ॥ भार्यास्तेषां समुद्भूता गिरिराजात्पिनाकिनः ॥ ३८ ॥ षट्त्रिंशत्परिमाणा ननतना
त्तनिशामय ॥ गौरी कोलाहली धीरा द्राविडी मालकौशिकी ॥ ३९ ॥ षष्ठी स्याद्देवगान्धारी श्रीरागस्य प्रियाः स्मृताः ॥ श्रीदेवा
कौशिकी चैव तथा चक्रमंजरी ॥ ४० ॥ गड्डगिरी देवशाखा रामगिरी वसन्तजा ॥ त्रिगुणा स्तम्भतीर्थी च आहिरी कुंकुमा तथा
वैराटी सामवेरी च षडेता भार्याः पंचमे [illegible] मताः ॥ भैरवी गुर्जरी चैव भाषा वेलागुली तथा ॥ ४१ ॥ कर्णाटकी रक्तहंसा षडेता भार्या
भैरवानुगाः ॥ बंगाली मधुरा चैव कामोदा चाभिनाविका ॥ ४२ ॥ देवगिरी च देवाली मेघरागस्यानुगाः ॥ तोडी मोटकी चैव नर
ड्डी त येव च ॥ ४३ ॥ मल्हारी सिन्धुमल्हारी नट्टनारायणानुगाः ॥ एता हि गिरिशं ज्ञात्वा नलामहे प्रोचमहेश्वरीम् ॥ ४४ ॥ स्वमूर्त्तिना

त्वोऽस्तु नमस्तेऽप्रहृष्यमते ॥७७॥ सद्योजाताय नस्तुभ्यं न्यो वामदेवाय ते नमः ॥ ईशानाय नमस्तुभ्यं पंचास्याय कपालिने ॥७८॥ विरूपाक्षाय भग्ग-
य भगनेत्रनिपातिने ॥ पूषदन्तनिपाताय महायज्ञनिपातिने ॥७९॥ मृगव्याधाय धर्माय कालयन्त्राय चक्रिणे ॥ महापुरुषपूज्या-
य गणानां पतये नमः ॥८०॥ गंगाधराय मृडिने भवानीप्रियकारिणे ॥ जगदानन्ददात्रे च ब्रह्मरूपाय ते नमः ॥८१॥ कृशानीऽकताप
गृणिने सूक्ष्माय गुरवे पिच ॥ नमो महत्स्वरूपाय भस्मनाशंककारिणे ॥८२॥ वैराग्यरूपिणे नित्यं योगाचार्याय ते नमः ॥ मयो-
क्तमप्रियं देव क्षमस्व स्मरसंहारकारक ॥८३॥ क्षन्तुमर्हसि विश्वेश मदीयं सांप्रतं प्रभो ॥ शापानुग्रहयोश्चैव कारणं त्वं न संशयः ॥८४॥ ॥३५॥
॥३५॥ ममापराधजो मन्युर्न कार्यो भवतानघ ॥ एवं प्रसादितः शंभुर्हृष्टात्मा त्रिदशैः सह ॥८५॥ तोषितो व्रतपरानन्दनिर्भरः प्राह तामुमाम् ॥
यश्च मां मत्स्तुतिं भक्त्या पठिष्यति त्वयोदिताम् ॥८६॥ तस्य चैव वियोगश्च न भविष्यति पार्वति ॥ जन्मत्रयधनैः पुत्रैः सर्वव्याधिविवर्जि-
तः ॥८७॥ इहैव विविधान् भोगानन्ते यास्यति मत्पुरम् ॥ इत्युक्ता तां महेशोऽपि स्वमंकं प्रत्यरोपयत ॥८८॥ देवी स्ववामभागं सा प्रतिजग्राह
35 पार्वती ॥ अर्धं कपालहस्तं च ग्रीवाहिगरलान्वितम् ॥८९॥ उरस्थमाला हारं च सितगौरं समन्ततः ॥ अर्धनारीश्वरं जनकं जटाभिर्भू-
षितं शिरः ॥९०॥ सितद्युति कलाखण्डरत्नभासावभासितम् ॥ स्वर्णाभरणसंयुक्तमिकृतो भुजगांगदम् ॥९१॥ एकेन कृति

५ यं भृगूत्तमः साक्ष्यं नन्त्रगे मम वर्त्तिन ॥६१॥ पर्वतोपि महानादं दृष्ट्वा पादतलाहतः ॥ धर्मीभिर्भ्रमयं तत्र मही सवनकाननान् ॥६२॥ हंसाश्वो
श्चतुरासीति मसस्तज्ञोत्तराप्सिवः ॥ लेलोप्फेल्लफस्विदास्तु मागधवन्दिनः ॥६३॥ महेशाद्यदयाज्ञा गागंधर्वा विप्रवकाप्सिनः ॥ तिष्णो देव
देवस्य सुरंगाप्य यस्त्रुताः ॥६४॥ प्रेमका साम्मयो यां च चक्रु राप्स्वया मोजसा ॥ किन्नराः पुष्पवर्षा पि दासन्ज्ञः स्वेगुरौहि ॥६५॥ एवं
चतुर्षु मासेषु यदा नन्त्यमजायत ॥ अतिक्रान्तापारज्ञाता निर्मलाकाशशोभिता ॥६६॥ पद्मखण्डसमाच्छन्नसरोवरमुखांबुजा ॥ फल
रत्नौषधीभिश्च किंचित्यारब्धमुखच्छविः ॥६७॥ ऊर्जे शुक्लचतुर्दश्यां प्रसन्नगिरिजातटे ॥ समाप्तव्रतचर्य्यः सईश्वरोऽर्पितदायभो
॥६८॥ सोचोवाच तदा शंभुर्विकचस्वरलोचनः ॥ विप्रशापप्रापितं च यत्रालिंगं भविष्यति ॥६९॥ नर्मदाजलसंभूतं विश्वपूज्यं भ
विष्यति ॥ एवमुक्त्वा ततस्तुष्टा हरस्तोत्रं चकार ह ॥७०॥ नमस्ते देववंद्याय महादेवाय मौलिने ॥ जगन्नेत्रे सवित्रे च शंकराय शिवा
य च ॥७१॥ कपर्दिने जपाद्याय अलगर्भाय ते नमः ॥ हिरण्यरेतसे तुभ्यं नीलग्रीवाय ते नमः ॥७२॥ नमो ब्रह्मण्यदेवाय शितिकंठाय भू
तिधराय च ॥ पंचवक्त्राय रूपाय निरूपाय नमो नमः ॥७३॥ सहस्राक्षाय शुभाय नमस्ते हैमनिवासने ॥ अन्धकासुरमोक्षाय पशूनां
पतये नमः ॥७४॥ विप्रवन्हिमुखायाथ हराय च भवाय च ॥ शंकराय महेशाय ईश्वराय नमो नमः ॥७५॥ अमूर्त्तब्रह्मरूपाय
मूर्त्तीनां भावनाय च ॥ नमः शिवाय सोमाय हराय च भवाय च ॥७६॥ नमः कृष्णाय सर्वाय त्रिपुरान्तकहारिणे ॥ अघोराय नम

चप्रतिमानवाः॥ शा शालग्रामस्तु गंडक्यां नर्मदायां महेश्वरः। उत्पद्यते स्वयं भूम्यामावेतौ नैव कल्मिषौ ॥२॥ चतुर्विंशतिभेदेन शालग्रामगतो
हरिः॥ परीत्य पुरुषो नित्यमेकरूपः सदाशिवः ॥३॥ शालग्रामशिलापत्र गंडकी विमलेऽकोले॥ तत्र स्नात्वा च पीत्वा च ब्रह्महत्यां पदमाप्नुयात्
॥४॥ तां पूजां शिलां विधिवद्गंडकीसंभवां शिलाम्॥ योगीश्वरो विशुद्धात्मा जायते नात्र संशयः ॥५॥ एतत्ते कथितं सर्वं यत्त्वया पृष्टोऽहमि
हृदवप॥ यथा हरोऽपि प्रश्नावं प्राप्तवांस्तन्निशामय ॥६॥ यः शृणोति नरो भक्त्या वाचयमानामिमां कथाम्॥ गिरीशानन्तपसंवादामुमादेहार्द्ध
वर्जितानाम्॥७॥ ब्रह्मरत्नुतिसंयुक्तां सा गच्छेत्परमां गतिम्॥ श्लोकार्द्धं श्लोकपादं वा समस्तं श्लोकमेव वा॥८॥ सयाति परमं स्थानं यत्र गत्वा ॥३६॥
॥३६॥ न शोचति॥ चातुर्मास्ये विशेषेण पठन् शृण्वन् नरोत्तमाः॥ लभन्ते चिन्तितां सिद्धिं धनपुत्रादिसंयुताः॥ यथाप्रह्लादयो देवा गीतवा
घार्द्धे भियोगतः॥ परां सिद्धिमवाप्स्यन्ति दुर्गा शिवसमीपगाः॥११॥ वर्षाकाले च संप्राप्ते भक्तियोगे जनार्दने॥ महेश्वरेऽथवा दुर्गायां
न भूयस्तनयो भवेत्॥१२॥ गणेशस्य सदा कार्या चातुर्मास्ये विशेषतः॥ पूजां मनुष्यो धीमानार्यपतो जायते हि सः॥१३॥ सूर्यो
निरोगतां दद्यात्तस्मात्पापः पूजयेत्सदा॥ चातुर्मास्ये समायाते विशेषफलदो नराणाम्॥१४॥ इदं हि पंचायतनं सेव्यते गृहमेधिभिः
॥ चातुर्मास्ये विशेषेण सेवितं चिन्तितप्रदम् ॥१५॥ शालग्रामगतं विष्णुं यः पूजयति नित्यदा॥ द्वारावती चक्रशिलासहितं मोक्षदा

36

वसनमन्यत्तत्पद्मकूलजं ततः ॥ ९१ ॥ मत्स्यवाहनसंयुक्तमन्यत्तीव्रवृषभांकितम् ॥ एकतः पार्षितः सेव्यमन्यतः सखिसेवितम् ॥ ९२ ॥ रूपमेवं विधं दृष्ट्वा
ब्रह्माद्यो देवतागणाः ॥ तुष्टुवुः परया भक्त्या तेजोभूषितलोचनम् ॥ ९३ ॥ त्वमेको भगवान् सर्वव्यापकः सर्वदेहिनः ॥ पिता त्वं द्रष्टैको यो२
ऽसि त्वं माता त्वं जीवसंज्ञकः ॥ ९४ ॥ साक्षी विश्वस्य बीजं त्वं ब्रह्माण्डव्यापकारकः ॥ उत्पद्यन्ते विलीयन्ते त्वयि ब्रह्माण्डकोटयः ॥ ९५ ॥
उन्मेयः सागरे नित्यं शालिते बुद्बुदा यथा ॥ अहं कदाचित्तेन त्वां कदाचित्तव भाषते ॥ ९६ ॥ क्वचित्संयोगे शिवादेवा प्रादुर्भूतास्तेनेज
गत् ॥ तथा ब्रह्माकारिणः सर्वे वयं ब्रह्मादयः सुराः ॥ ९७ ॥ अनन्तो वै भवोऽनन्तोऽनन्तधामाऽस्यनन्तकः ॥ अनन्तः सर्वभंगार्थे ईदृशं ते रूपम पृ.५
द्भुतम् ॥ ९८ ॥ भवानीलं भयं नित्यमशिवा नाम विश्रुता ॥ शिवा नाम प्रदात्री त्वं तपसामपि त्वं फलम् ॥ ९९ ॥ यः शिवः सः स्वयं विष्णु
र्यो विष्णुः स तु शिवः ॥ इत्यभेदमतिर्ज्ञाता सम्यगानन्दप्रसादतः ॥ १०० ॥ यत्किंचिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा ॥ मध्ये बाह्ये च तत्स
र्वं त्वं व्याप्य स्थितः परः ॥ १०१ ॥ जगत्पूज्य प्रसूरेषा नान्या जगद्दृश्ये न यां विना ॥ प्रसादं कुरु देवेशि शिवे च प्रसन्ना भव नः ॥ १०२ ॥ अस्तु काचिद्वरा सर्वे
ऽभीष्टं जन्मनैव यथा गतम् ॥ गालव उवाच ॥ नित्यमेनदखिलं भुवि ये मनुष्याः संसारसागरसमुत्तरणैककपोतम् ॥ १०३ ॥ संचिन्तयन्ति मनसा ह
तकिल्बिषाः शिवशिवस्वरूपमनुयान्ति विमुक्तसंगाः ॥ १०४ ॥ ०ः ॥ इति श्रीस्कन्दपुराणे ब्रह्मनारदसंवादे पार्वत्याः स्वमाहात्म्ये हरतां
ऽवर्णनं नाम द्वापंचाशोऽध्यायः ॥ ५२ ॥ ०ः ॥ गालव उवाच ॥ एवं तेन सर्वथा शापाच्च पार्वती शापपीडिता ॥ अनपत्या बभूवुश्च तथा

मो॥

कालेस्मिञ्जन्तुनिचये नयावातं प्राप्य भक्तो नहि सीदतीति॥३१॥ ⁂ इति श्रीस्कन्दपुराणे ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये लक्ष्मी
नारायणमहिमावर्णनं नाम त्रयोविंशोऽध्यायः॥२३॥ गालव उवाच॥ एकदा भगवान् रुद्रः कैलासशिखरे स्थितः॥ इध्मधारपर
मां लक्ष्मीमुमया सहितः शिवः॥१॥ गणानां कोटयस्तत्र समंतं पर्यपर्युपावारयन्॥ वीरगल्लो वीरभद्रो वीरसेनश्च भृंगिरादयः॥२॥
धुंधिस्तुंडिस्तथा नन्दी भृण्यहन्तस्तथोत्कटः॥ विकटः करालकश्चैव हरः कोशोविघराटकः॥३॥ मालाधरः पाशधरः शृंगीच
नरनस्तथा॥ भुरपीन्कटः शालिभद्रो महाभद्रो विभद्रकः॥४॥ करापः कालपः कालो घनपो रक्तलोचनः॥ विकटास्यो भग्नस्कं
॥३१॥ श्च दीर्घजिह्वो विरोचनः॥५॥ पारदो घनदो धुंधी हंसकी नरकस्तथा॥ पंचशीर्षस्त्रिशीर्षश्च क्रोडदंष्ट्रो महाद्भुतः॥६॥ ॥३१॥
सिंहवक्त्रो वृषहनुः प्रचंडः क्रोडेरवचो॥ शैवान्येयवरुवसद्दाभयसमीपगाः॥७॥ महादेवजयेत्युच्चैर्भद्रकालीसमन्विताः॥
भूतप्रेतपिशाचानां समूहापस्यवल्लभाः॥८॥ श्रुत्वैवं तं समीप[illegible]स्था वसन्ते समुपागते॥ वनराजिविराजितस्मिन् नवकोश
37 कशोभिताः॥९॥ दक्षिणानिलसंस्पर्शः कवीनां सुखकृद्भवौ॥ वियोगिहृदयाकर्षी किंशुकः पुष्पशोभितः॥१०॥ इन्द्र
निद्रिक्रियाभावं चिक्रीडुश्च समन्ततः॥ तस्मिन् निगाढे समये मनस्सु न्नाद्रके तथा॥११॥ नन्दी दण्डधरः संज्ञां दद्ध्वा चकोरैरी

यकम् ॥१६॥ चातुर्मास्यविशेषेण दर्शनादेति मुक्तिदम् । यस्मिन् स्तुते स्तुतं सर्वं पूजिते पूजितं [illegible] जगत् ॥१७॥ पूजितः पठितो ध्यातः स्मृतो वै
कलुषापहः ॥ शालग्रामे किंपुनर्यच्छालग्रामगतो हरिः ॥१८॥ पुनः हर नैवेद्यं फलं चापि धृतं जलम् ॥ चातुर्मास्ये विशेषेण शालग्राम
गतं शुभम् ॥१९॥ तिलाः प्रनन्ति सकलं शालिग्रामे शूद्रजं ॥ चातुर्मास्ये विशेषेण नरं भक्त्या समन्वितम् ॥२०॥ स लक्ष्मीसहितो नि
त्यं धनधान्यसमन्वितः ॥ महाभाग्यवशाद्देहे जायते नात्र संशयः ॥२१॥ स लक्ष्मीसहितो विष्णुर्विज्ञेयो नात्र संशयः ॥ तं पूजयेन्महा
भक्त्या स्थिरा लक्ष्मीर्गृहे भवेत् ॥२२॥ नाब्दं [illegible] नौकेनावरुज्ज्ञति पातकम् ॥ नावत् [illegible] शरीरेऽस्मिन् न पापा [illegible] हरिम् ॥२३॥ स
स्वपूज्यते पत्रपंचकोशं पवित्रकम् ॥ करोति सकलं [illegible] नततो शुभसंभवः ॥२४॥ एतद्देव महाभाग्यमेतद्देव महत्तपः ॥ एष स्वपरो
मो तो यत्र लक्ष्मीशापूजनम् ॥२५॥ शंखे [illegible] लक्ष्मीनारायणात्मकः ॥ तुलसी कृष्णसारोऽन्वेपत्र द्वारावती शिला ॥२६॥ तत्र
श्रीर्विजयो विष्णुर्मुक्तिरेव चतुष्टयम् ॥ लक्ष्मीनारायणे पूज्या विधातुमनुजस्य तु ॥२७॥ [illegible] कोऽभयीत तत्स्व
यातु ॥ चातुर्मास्ये विशेषेण पूज्यो लक्ष्मीपतिर्हरिः ॥२८॥ कुर्वन्तस्तस्य देवस्य ध्यानं [illegible] नाशनम् ॥ तुलसीमंजरीभिश्च
पूजितो जन्मनाशनः ॥२९॥ पूजितो विल्वपत्रेण चातुर्मास्ये [illegible] लमः ॥३०॥ सर्वप्रयत्नेन सर्वं सेव्यो यो व्याप्य विश्वं जगतामधीशः ॥

[illegible] ॥

दीनां दारा ग्निलं प्रजायते ॥२६॥ एतदेव परं गुह्यमेतदेव परं महः॥ एतद्धि दुर्लभं लोके लोकत्रयविभूषणम् ॥२७॥ प्राप्यते जन्मकोटीभिः
शुभाशुभविनाशकम्॥ एतदेव परं [illegible] ॥ ज्ञानं द्वादशाक्षरचि
न्तनम्॥२८॥ चातुर्मास्ये विशेषेण ब्रह्मलदं चिन्तितप्रदम् एतद्द्वादशजं स्तोत्रं यः समाश्रयते सदा ॥२९॥ मनसा कर्मणा वाचा तस्य
नास्ति पुनर्भवः॥ द्वादशाक्षरसंयुक्तं चक्रं द्वादशभूषितम् ॥३०॥ मासद्वादशनामानि विन्यस्य ये भक्तितत्पराः॥ शालग्रामेषु
॥३८॥ तान्स्तुत्वा न्यस्तैः व्यवहरं हि सः॥३१॥ दिवसे तस्य द्वादशाह फलं लभेत्॥ द्वादशात्ममाहात्म्यं वर्णितुं नैव शक्यते ॥३२॥ जिव्हा ॥३८॥
सहस्रै रपि च वक्तुं शक्यते न पाप्यते॥ महामंत्रो ह्ययं लोके जप्यो ध्यातस्तुतस्तथा ॥३३॥ पापहा सर्वमासेषु चातुर्मास्ये विशेषतः॥ इदं
रहस्यं वेदानां पुराणानामनेकधा॥३४॥ [illegible] ॥ पुत्रप्रदानेन यास्येन शोके भवति शास्त्रवर्ती॥ वर्षे तथाश्रमैः स्वप्रणा
38 वेन समन्विते॥ [illegible]॥३५॥ जपेत् ध्यानेः शमपरैर्मोक्षं प्राप्यते निश्चितम्॥ शूद्राणां चापि नारीणां प्रणवेन विवर्जितः॥३६॥
प्रकृतीनां च सर्वासां न मंत्रो द्वादशाक्षरः॥ न जपो न तपः कार्यं काय क्लेशादिभिर्युक्ता ॥३७॥ विप्र भक्त्या च दानेन वि
ष्णुध्यानेन सिध्यति॥ नासां मंत्रो रामनाम ध्येयः कोऽप्यधिकं भवेत् ॥३८॥ रामेति व्यक्षरजपः सर्वपापापनोदकः॥ गच्छन्

परः ॥ अलसंचापलदोषेण तपःक्षयन्तुभोगस्याः ॥१२॥ तदासर्वंच नमस्पि मूर्खांऽजमभूत्पुनः ॥ गच्छन्तेतप आतस्थुर्दृष्ट्वा कीर्तिं वसन्तजाम् ॥१३॥
ततः सविस्मजननी पार्वतीप्राह शंकरम् ॥ इयंत्तेकरगा नित्यमत्तमाला महेश्वर ॥१४॥ त्वया किंजप्यते देव संदेहयति मे मनः ॥ त्वमेकः
सर्वभूतानामादिकर्त्ता सकलेश्वरः ॥१५॥ नमाता नपिता यं धुस्तवजातिर्नकश्चन ॥ अहंन्नवपरं किंचिद्दृष्टिनास्तीति किंचन ॥१६॥
अमेशा त्वं समायुक्तो श्वासोश्वासपरायणः ॥ जपन्नपि महाभत्याद्दृश्यते त्वं मयासदा ॥१७॥ त्वत्तः परतरं किंचित्त्वं ध्याय
सि चेत्तथा ॥ तन्मे कथय देवेश यद्यहं दयिता तव ॥१८॥ इति पृष्टः सदा पार्वत्या उवाच हरिसेवकः ॥ हेन्नी मसह स्लारणां सारं ध्यायामि
नित्यशः ॥१९॥ जपामि राम नामांकमवतारं समप्तमम् ॥ चतुर्विंशति संख्याकानि प्रादुर्भावान् हरेर्गुणान् ॥२०॥ एते षामपि
यत्सारं प्रणवाख्यं महत्फलम् ॥ द्वादशाक्षरसंयुक्तं अलंरूपं सनातनम् ॥२१॥ अक्षरत्रयसंबद्धं भामत्रयेसमन्वितम् ॥ बधि
न्दुप्रयार्थं शश्वज्जपामि जपमालया ॥२२॥ वेदसारमिदं नित्यं सत्तारं सततोपतम् ॥ निर्मलं सम्मतं शान्तं सद्रूपमन्तोपमम्
॥२३॥ कलातीतं निर्वशागं निर्व्यापारं महत्परम् ॥ विश्वाधारं जगन्मध्यं कोटिब्रह्माण्डवीजकम् ॥२४॥ जडं प्रबुद्धक्रियं चापि निर्जे
न निवामकम् ॥ प यस्योत्वा मुच्यन्ते क्षिप्रं घोरसंसारबंधनात् ॥२५॥ ॐकारसहितं यच्च द्वादशाक्षरबीजकम् ॥ जपतः पापको

